International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 103-106
© 2026 IJMH
www.themultijournal.com
Received: 29-01-2026
Accepted: 17-02-2026
Publish : 18-02-2026

**हरिश्चन्द्रः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**प्रो.सनन्दनकुमारत्रिपाठी**
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**Correspondence:**
**हरिश्चन्द्रः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

# एकाग्रभारतनाटके भारतीयज्ञानपरम्परायाः प्रतिबिम्बनम्

**हरिश्चन्द्रः, प्रो.सनन्दनकुमारत्रिपाठी**

**सारांशः**

प्रस्तुतः शोधः प्रो. रामलखनपाण्डेयप्रणीतस्य "एकाग्रभारतम्" इति नाटकस्य भारतीयज्ञानपरम्परया सह गहनसम्बन्धस्य विश्लेषणं करोति। अस्मिन् नाटके शिक्षा, समाजः, राजनीतिः, अध्यात्मं च इति चतुर्णां क्षेत्राणां समन्वितं स्वरूपं नाट्यात्मकरीत्या प्रस्तुतम्। पञ्चाङ्कात्मकनाट्यरचनायां गुरुकुलपरम्परायाः पुनर्वाचनं, सामाजिकसमरसतायाः पुनर्व्याख्या, धर्माधिष्ठितराजनीतेः विवेचनं तथा च आध्यात्मिकदर्शनस्य उत्कर्षः स्पष्टतया दृश्यते।

नाटकस्य कथावस्तु महाभारतीयपरम्परायाः आधारे स्थित्वा समसामयिकसन्दर्भेषु पुनरालोचिता अस्ति। द्रोण– एकलव्य– अर्जुनादीनां पात्राणां माध्यमेन एकाग्रतायाः व्यक्तिगत-सामाजिक-राष्ट्रीयस्वरूपाणि उद्घाटितानि । अत्र एकाग्रता केवलं मानसिकप्रक्रिया न, अपितु शिक्षाव्यवस्थायाः, सामाजिकचेतनायाः, राष्ट्रनिर्माणस्य च मूलाधारः इति प्रतिपाद्यते।

नाटकं समग्रदृष्टिकोणं, सामञ्जस्यसिद्धान्तं, बहुस्तरीयवास्तविकतायाः अवधारणां तथा कालचक्रदर्शनं च प्रभावीरीत्या प्रस्तौति। प्रतीकात्मकनाट्यसाधनैः धनुषा, अङ्गुष्ठदानेन, शिवावतरणेन च ज्ञानस्य, त्यागस्य, दैवी-मानवीयसहयोगस्य गूढार्थाः प्रकाश्यन्ते। भाषाप्रयोगे संस्कृत-प्राकृतयोः समन्वयः भारतीयबहुभाषिकसंस्कृतेः सजीवप्रतिबिम्बनं करोति।

अयं शोधः दर्शयति यत् "एकाग्रभारतम्" नाटकं भारतीयज्ञानपरम्परायाः सर्जनात्मकपुनर्व्याख्यानं कृत्वा आधुनिकशिक्षासुधारे, सामाजिकसमरसतायां, राष्ट्रीयएक्ये च महत्त्वपूर्णं सैद्धान्तिकयोगदानं ददाति। अतः संस्कृतनाट्यपरम्परायां एषा कृतिः न केवलं साहित्यिकमूल्येन, अपितु समसामयिकबौद्धिकप्रासंगिकतया अपि विशिष्टस्थानं धारयति।

**भूमिका**

भारतीयज्ञानपरम्परा अस्माकं सांस्कृतिकविरासतस्य अमूल्यं निधिः अस्ति, या सहस्राब्दीनां अनुभवसञ्चयेन समृद्धा सती सदैवैव गतिशीलता, समायोजनशीलता च प्रदर्शितवती। एषा परम्परा केवलं दार्शनिकचिन्तनस्य एव न, अपितु व्यावहारिकजीवनस्य, सामाजिकसंरचनायाः, शैक्षणिकपद्धतेः, राजनैतिकव्यवस्थायाश्च समग्रं दर्शनं प्रस्तौति। किन्तु वर्तमाने काले पाश्चात्यशिक्षाप्रणाल्याः प्रभावेण एषा परम्परा उपेक्षिता, विस्मृता च प्रायः भवति।

"एकाग्रभारतम्" इति संस्कृतनाटकं प्रख्यातसंस्कृतविदुषा प्रो.रामलखनपाण्डेयमहोदयेन विरचितम्। डॉ. पाण्डेयः झारखण्डराज्ये लब्धजन्मा श्रोत्रियब्राह्मणः संस्कृतसाहित्ये गभीरपाण्डित्यं, नवीनचिन्तनं च योजयित्वा अनेकान् ग्रन्थान् प्रणीतवान्। एतत् पञ्चाङ्कीयं संस्कृतनाटकं वर्तते यत् पौराणिक-कथावस्तुनः आधारेण अपि समसामयिकविषयाणां गम्भीरं विश्लेषणं प्रस्तौति। नाटकं महाभारतस्य गुरुकुल-शिक्षण-एकलव्य-द्रोणाचार्य-प्रसङ्गानाम् आधारेण विकसितम्, किन्तु तत्र नूतनदार्शनिक-व्याख्या योजिता।

एतस्मिन् सन्दर्भे प्रो. रामलखनपाण्डेयविरचितं "एकाग्रभारतम्" इति संस्कृतनाटकं विशिष्टं स्थानं बिभर्ति। इदं नाटकं महाभारतस्य पौराणिककथावस्तुनः आधारेण रचितमपि समसामयिकराष्ट्रिय-विमर्शस्य सजीवं माध्यमं भवति। अत्र पारम्परिककथानकं नूतनदृष्टिकोणेण प्रस्तुत्य

भारतीयज्ञानपरम्परायाः मूलभूतसिद्धान्ताः सर्जनात्मकरूपेण पुनः प्रतिष्ठापिताः।

अस्मिन् नाटके एकाग्रतायाः संकल्पना केवलं व्यक्तिगतध्यानावस्थायाः एव न, अपितु राष्ट्रियएकीकरणस्य, सामाजिकसमरसतायाः, शैक्षणिकपरिवर्तनस्य च मूलाधारत्वेन प्रस्तुता। गुरुकुलस्य शैक्षणिकव्यवस्था, एकलव्यस्य सामाजिकसमावेशिता, द्रोणद्रुपदयोः राजनैतिकसंवादः, शिवार्जुनयोः आध्यात्मिकसाक्षात्कारः च - एते सर्वेऽपि अङ्गाः भारतीयज्ञानपरम्परायाः विविधपरिमाणानां दर्शनं कुर्वन्ति।

एतत् नाटकं विशेषतया महत्त्वपूर्णं भवति यतोह्यत्र संस्कृतभाषायाः शास्त्रीयसौन्दर्येण सह प्राकृतभाषायाः लौकिकसरलतायाः समन्वयः दृश्यते, यः भारतीयसमाजस्य बहुभाषिकस्वरूपस्य प्रतिबिम्बनं करोति। तथैव पञ्चाङ्कानां संरचना पञ्चकोशसिद्धान्तस्य, नाटकीयप्रतीकानि च भारतीयदर्शनस्य गहनतां प्रकटयन्ति।

अस्मिन् शोधे "एकाग्रभारतम्" नाटकस्य माध्यमेन भारतीयज्ञानपरम्परायाः विविधांगानां विश्लेषणं करिष्यते। विशेषतया शिक्षादर्शनस्य, सामाजिकसंरचनायाः, राजनीतिदर्शनस्य, आध्यात्मिकतायाश्च पारस्परिकसम्बन्धाः, तेषां समसामयिकप्रासंगिकता च अनुसन्धेया। नाटकस्य सैद्धान्तिकयोगदानं, तस्य शैक्षणिक-सामाजिकप्रभावश्च मूल्याङ्कनीयः।

एषः शोधः न केवलं साहित्यिकविश्लेषणं, अपितु भारतीयज्ञानपरम्परायाः पुनरुत्थानस्य, तस्य आधुनिकसंदर्भे प्रासंगिकतायाश्च अन्वेषणं करिष्यते। यतः "एकाग्रभारतम्" नाटकं भारतीयमनीषायाः सर्जनात्मकसामर्थ्यस्य, परम्परायाः नवीनीकरणक्षमतायाश्च ज्वलन्तं प्रमाणम् अस्ति।

**ग्रन्थस्य ग्रन्थकारस्य च परिचयः**

आधुनिककविपरम्परायाम् आचार्यः **रामलखनपाण्डेयोऽपि** वर्तते । प्रो. रामलखनपाण्डेयः राष्ट्रियसंस्कृतसंस्थानस्य लक्ष्मणपुरपरिसरे साहित्यविभागस्याचार्योऽध्यक्षश्च आसीत् । आचार्येण साहित्यशास्त्रे नैकाः कृतयः अकारिषत । साहित्यशास्त्रस्य विविधाः विधाः वर्तन्ते तेषु महाकाव्यं, गीतिकाव्यं, रूपकं, गद्यकाव्यं, संदेशकव्यं, खण्डकाव्यं, शतककाव्यम् इत्यादयः वर्तन्ते । पाण्डेयवर्येणशाकुन्तलं धर्मविज्ञानम् , गानायनी, गीतिकालहरी , एकाग्रभारतम् , शब्दार्थप्रकाशश्चेत्यादयः अनेकाः रचनाः कृताः ।

कविवररामलखनपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य संवर्धने अपूर्वं योगदानं कृतवान् ।सः विशिष्टः प्रख्यातश्च विद्वान् वर्तते।आधुनिकसंस्कृतसाहित्ये तेषां काव्यकृतयः अत्यन्तं उपयोगिन्यो वर्तन्ते । समाजस्य कृते अपि अत्यन्तं महत्त्वपूर्णाः ताः रचनाः भवन्ति ।

संस्कृतसाहित्यशास्त्रं व्यापकं वर्तते । अस्मिन् साहित्यशास्त्रे बहुविधानि काव्यानि वर्तन्ते । तेषु श्रव्यकाव्यानि दृश्यकाव्यानि मिश्रितकाव्यानि च वर्तन्ते । श्रव्यकाव्येषु महाकाव्यं गीतिकाव्यञ्च महत्त्वपूर्णं स्थानं धारयतः । कविवररामलखनपाण्डेयः साहित्यशास्त्रस्य मूर्धन्यः आचार्यः कविश्च वर्तते । अनेन महोदयेन गानायनी, गीतिकालहरी, एकाग्रभारतम्, शब्दार्थप्रकाशः इत्यादयः अनेके ग्रन्थाः रचिताः।

**एकाग्रभारतं नाटकम्**

पाण्डेयमहोदयेन महाभारताश्रितम् एकाग्रभारतं नाटकं विरचितम्। अस्मिन् नाटके पञ्च अङ्काः वर्तन्ते । एकाग्रभारतमिति नाटकस्य कथावस्तु प्रख्यातम् ऐतिहासिकं वर्तते । अस्य नाटकस्य अङ्गिरसरूपेण वीररसः विहितोऽस्ति । युगेऽस्मिन् भारतीयां व्यवस्थां प्रतिपालयितुं हस्तिनापुर-राजकीय-गुरुकुले छात्रधर्मोचित्तं धनुर्वेदविद्याव्रतं प्रवर्तमानं वर्तते । अस्मिन् गुरुकुले पाण्डवाः कौरवाश्च विद्यां प्राप्नुवन्तः आसन् । नाटकस्य प्रमुखपात्राणि एवं विद्यन्ते यथा द्रोणाचार्यः, एकलव्यः, अर्जुनः, भीमसेनः, युधिष्ठिरः, नकुलः, दुर्योधनः, दुःशासनः, सहदेवः, कर्णः, द्रुपदश्च इमानि पात्राणि वर्तन्ते ।

नाटकं काव्येषु रमणीयं भवतीति प्रसिद्धम् –

**काव्येषु नाटकं रम्यम् ।**

**शोधोद्देश्यानि**

**प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"** अस्या उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति । अतः शोधकार्यमिदं निम्नलिखितानि उद्देश्यानि अधिकृत्य विधास्यते -

1.एकाग्रभारतनाटके निहितायाः भारतीयज्ञानपरम्परायाः विविधांगानां विश्लेषणम्।

2. नाटकीयकथानकेन भारतीयशिक्षादर्शनस्य, सामाजिकसंरचनायाः च प्रतिपादनस्य अध्ययनम्।

3.एकाग्रतायाः भारतीयदार्शनिकसंकल्पनायाः राष्ट्रियएक्यस्य च सम्बन्धस्य निरूपणम्।

4.संस्कृतसाहित्ये पौराणिककथानकानां समसामयिकीकरणस्य पद्धतेः मूल्याङ्कनम्।

**शोधविधिः**

अस्मिन् शोधे गुणात्मकविश्लेषणपद्धतिः **(Qualitative Analysis Method)** स्वीकृता। प्राथमिकस्रोतत्वेन "एकाग्रभारतम्" नाटकस्य मूलपाठः, गौणस्रोतत्वेन च भारतीयदर्शनस्य, शिक्षाशास्त्रस्य, नाट्यशास्त्रस्य च ग्रन्थाः आधारीकृताः। तुलनात्मकविश्लेषणं **(Comparative Analysis)**, साहित्यिकविश्लेषणं **(Literary Analysis)** च प्रमुखोपकरणत्वेन प्रयुक्तम्।

शोधस्य प्रकारद्वयं भवति .1प्रयोगात्मकम्, .2अप्रयोगात्मकञ्चेति। प्रकृतस्य शोधकार्यस्य प्रकृतिः अप्रयोगात्मिका वर्तते । तत्रापि " शोधकार्यमिदं गुणात्मक शोधान्तर्गतं वर्तते। गुणात्मकं शोधकार्य विश्लेषणादिकं विविधप्रकारकं वर्तते। - दार्शनिकैतिहासिकविषयवस्तु स्वीकृतस्य शोधकार्यस्य प्रकृतिः विषयवस्तुविश्लेषणात्मिका वर्तत इत्यतः शोधकार्यमिदं सम्पादयितुं विषयवस्तुविश्लेषणविधेः प्रयोगो विधास्यते ।

**प्रतिपाद्यविषयाः**

**1. शिक्षाव्यवस्थायाः दार्शनिकं आधारः**

नाटके भारतीयशिक्षायाः त्रिस्तरीयं स्वरूपं प्रदर्शितम् -

**ज्ञानम्-** धनुर्वेदस्य तकनीकीज्ञानम्

**कौशलम् -** शरसन्धानस्य व्यावहारिककौशलम्

**मूल्यम् -** एकाग्रतारूपं चारित्रिकमूल्यम्

**द्रोणाचार्य -** एतत् स्पष्टयति -

**"एकाग्रता धनुर्वेदे, भवत्युपनिषत् परा।[1]"** (१.७)

अत्र उपनिषद् इति शब्देन शिक्षायाः आध्यात्मिकपरिमाणं सूचितम्। भारतीयपरम्परायां शिक्षा केवलं सूचनाप्राप्तिः न, अपितु समग्रव्यक्तित्वविकासः अस्ति।

**2. गुरुशिष्यपरम्परायाः समकालीनं व्याख्यानम्**

परम्परागते गुरुशिष्यसम्बन्धे नाटकं नूतनं परिमाणं योजयति। एकलव्यस्य प्रकरणे त्रयः शिक्षाप्रतिमानाः दृश्यन्ते -

**साम्प्रदायिकम्-** राजकुमाराणां गुरुकुले शास्त्रीयशिक्षा

**परोक्षम्-** एकलव्यस्य मृण्मयप्रतिमामाध्यमेन शिक्षा

**आध्यात्मिकम्-** शिवेन दत्ता दिव्यशिक्षा

एषा बहुस्तरीयता भारतीयशिक्षायाः सर्वसमावेशितां प्रतिबिम्बयति।

**3. एकाग्रतायाः बहुआयामी संकल्पना**

नाटकं "एकाग्रता" इत्यस्य पदस्य त्रिविधं अर्थं प्रस्तौति -

व्यक्तिगतम्- ध्यानावस्थायाः मानसिकएकाग्रता

शैक्षणिकम्- लक्ष्यसाधनाय बुद्धिसमाधानम्

राष्ट्रियम्- राष्ट्रैक्यस्य भावनात्मकसंकल्पना

द्रोणः एतत् स्पष्टं करोति -

**"एकाग्रता समाख्याता, सर्वसिद्धिप्रदायिका।**

**विकीर्णं हि मनो यस्य, लक्ष्यं तस्य विकीर्यते॥[2]"** (१.६)

**4. सामाजिकसमरसतायाः दर्शनम्**

एकलव्यस्य पात्रं भारतीयसमाजस्य जातिप्रथायाः जटिलतां प्रकटयति। परं नाटककारः समाधानं प्रस्तौति -

**"स्वधर्मं लोकधर्मेण सङ्गमय्य यथायथम्।**

**नायकाः सेवकायन्ते सेवका नायकोपमाः॥[3]"** (१.१५)

अत्र स्वधर्म-लोकधर्मयोः समन्वयेण सामाजिकसमरसतायाः मार्गः सूचितः।

**5. भारतीयराजनीतिदर्शनस्य प्रतिफलनम्**

चतुर्थाङ्के द्रोणद्रुपदयोः संवादे भारतीयराजनीतिदर्शनस्य मूलतत्त्वानि प्रकटितानि -

**धर्मशासनम्-** न्यायाधारितं शासनम्

**मैत्रीसिद्धान्तः-** मित्रतायाः राजनैतिकमहत्त्वम्

**प्रतिशोधस्य नैतिकता-** प्रतिशोधस्य धर्म्यसीमाः

द्रोणः उद्घोषयति -

**"राष्ट्रं विशृंखलं मा भूदिति संकल्पनापरः।**

**एकाग्रं भारतं कर्तुमारम्भः सुमहानयम्॥[4]"** (४.८)

**6. आध्यात्मिकतायाः लौकिकं स्वरूपम्**

नाटके आध्यात्मिकता न केवलं वैयक्तिकसाधना, अपितु सामाजिककर्तव्यपरायणतायाः आधारः इति प्रतिपादितम्। एकलव्यः कथयति -

**"नारायणश्वेनगरे शिवः साक्षाद्वनान्तरे।**

**द्वयोर्योगेन राष्ट्रस्य स्वरूपं विश्वतोमुखम्॥[5]"** (३.१)

अत्र नागरिकजीवनस्य (नारायणश्वेनगर) वन्यजीवनस्य (वनान्तर) च सामञ्जस्ये राष्ट्रस्य समग्रत्वं निहितम्।

**7. परम्परायाः नवीनीकरणस्य कला**

नाटककारः पौराणिककथानकानां माध्यमेन समसामयिकविषयाणां प्रस्तुतिं कृत्वा परम्परायाः नवीनीकरणस्य उत्कृष्टं निदर्शनं प्रस्तौति। सूत्रधारः स्पष्टं करोति -

**"पाश्चात्यं वैश्वीकरणं पश्चात्तापाय भवति।**

**वयमत्र भारतीयं वैश्वीकरणं प्रयोक्तुमुद्यताः॥[6]"** (१.४)

अत्र भारतीयमूल्याधारितं वैश्वीकरणं "एकाग्रभारतम्" इति संकल्पनायां प्रतिष्ठितम्।

**8. भाषायाः दार्शनिकी भूमिका**

नाटकं संस्कृतस्य शास्त्रीयसौन्दर्यं, प्राकृतस्य लौकिकसरलतां च समन्वित्य भारतीयभाषावैविध्यस्य प्रतिबिम्बनं करोति। भाषायाः एषा स्तरीयता भारतीयसमाजस्य बहुसांस्कृतिकत्वं प्रतिफलयति।

**9. नारीपात्राणां प्रतीकात्मकत्वम्**

यद्यपि नाटके प्रमुखनारीपात्राणि न सन्ति, तथापि भवानी, पार्वती, किराताङ्गनाः च प्रतीकरूपेण भारतीयनारीत्वस्य विविधपरिमाणानि प्रस्तुवन्ति। पञ्चमाङ्के किराताङ्गनानां गीतं नारीशक्तेः प्रतीकत्वेन विराजते -

**"देवासुर-निब्बिसेस बहुविध-विचित्तभेस।**

**अभयंकर शिवशंकर एकलब्ब-हिबा॥[7]"** (५)

**10. समयस्य दार्शनिकं बोधः**

नाटके त्रिविधकालस्य संकल्पना दृश्यते -

**भूतकालः-** परम्परायाः विरासतम्

**वर्तमानकालः-** समसामयिकसंघर्षाः

**भविष्यकालः-** राष्ट्रियभाविनी कल्पना

एतत् त्रिकालदर्शनं भारतीयज्ञानपरम्परायाः सारभूतम्।

**11. युद्धस्य नैतिकं स्वरूपम्**

अर्जुन-एकलव्ययोः संघर्षे युद्धस्य नैतिकपरिमाणं प्रकटितम्। अर्जुनः कथयति -

**"धर्मयुद्धे जयो नास्ति विना पाशुपतं बलम्॥[8]"** (५.६)

अत्र युद्धं नैतिकलक्ष्यसाधनम्, न तु केवलं शारीरिकप्रहारः।

**12. दैवीमानवीयसहयोगस्य सिद्धान्तः**

पञ्चमाङ्के शिवस्य अवतरणं भारतीयदर्शने दैवीमानवीयसहयोगस्य सिद्धान्तं प्रतिपादयति । शिवः उभयोः शिरसि हस्तं दत्वा उद्घोषयति-

**"सव्यापसव्यं नयनद्वयं यथा निजान्तराले क्वचिदेकदैवतम्।**

**तथैव भाग्यं समवेति पौरुषं तथैव शक्तिर्भुवि भक्तिभाविता॥[9]"** (५.४)

**13. राष्ट्रियएक्यस्य सांस्कृतिकमूलाधारः**

नाटकस्य समाप्तौ प्रस्तुतः सन्देशः भारतीयराष्ट्रियतायाः सांस्कृतिकमूलाधारं प्रकटयति -

**"राष्ट्रमेकीकृतं भूयादेकाग्रे जित्वरे नरे।**

**तेन सख्येन च हरिर्भुवो भारं हरेदिति॥[10]"** (५.२६)

अत्र राष्ट्रियएक्यस्य उद्देश्यं "भूभारहरणम्" इति निर्दिष्टं भारतस्य वैश्विकदायित्वं सूचयति।

**14. ज्ञानमीमांसायाः प्रतिबिम्बनम्**

नाटकं भारतीयज्ञानमीमांसायाः त्रिस्रोतसिद्धान्तं प्रतिबिम्बयति -

**प्रत्यक्षम्-** प्रयोगात्मकशिक्षा (धनुर्विद्या)

**अनुमानम्-** तार्किकविवेचना (शास्त्रार्थः)

**शब्दः-** गुरूपदेशः, आगमप्रमाणम्

एषा बहुविधज्ञानप्राप्तिः भारतीयशिक्षापद्धतेः विशिष्टता।

**15. समन्वयस्य दार्शनिकं आदर्शः**

समग्रतया नाटकं भारतीयदर्शनस्य समन्वयसिद्धान्तं प्रतिपादयति -

**व्यक्ति -**समाजयोः समन्वयः
**परम्परा-**नवीनीकरणयोः सामञ्जस्यम्
**अध्यात्म-** भौतिकयोः सन्तुलनम्
**विविधता-** एक्ययोः सहअस्तित्वम्

**निष्कर्षाः**

"एकाग्रभारतम्" नाटकं भारतीयज्ञानपरम्परायाः समग्रं प्रतिबिम्बनं प्रस्तौति। अत्र न केवलं शास्त्रीयसिद्धान्तानां प्रस्तुतिः, अपितु तेषां व्यावहारिकानुप्रयोगस्यापि दर्शनं प्राप्यते। नाटकस्य प्रमुखप्रतिपाद्यं तत्त्वम् अस्ति यत् भारतीयज्ञानपरम्परा न जडा नापि एकरूपा, अपितु गतिशीला, बहुरूपा, समन्वयशीला च ।

एतत् नाटकं संस्कृतसाहित्ये नूतनप्रयोगस्य, भारतीयमनीषायाः समसामयिकाभिव्यक्तेश्च ज्वलन्तं उदाहरणम्। अत्र नाट्यकलायाः माध्यमेन दार्शनिकविमर्शस्य, शैक्षणिकसुधारस्य, सामाजिकस-मरसतायाः, राष्ट्रियएक्यस्य च बहुस्तरीयं विश्लेषणं सङ्गृहीतम् ।

एवं "एकाग्रभारतम्" न केवलं साहित्यिककृतिः , अपितु भारती-यज्ञानपरम्परायाः प्रासंगिकतायाः, सर्जनात्मकपुनरुत्थानस्य च प्रमाणपत्रम्। इयं कृतिः प्रमाणयति यत् भारतीयपरम्परा अतीतस्य गौरवगाथा एव न, अपितु वर्तमानस्य मार्गदर्शिका, भविष्यस्य च निर्मात्री अस्ति।

**सन्दर्भग्रन्थसूची**


आचार्यः, डॉ. सत्यनारायण , (2005). संस्कृतशोधप्रविधिः तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम् ।

पाण्डेय , डॉ रामलखन , (वि. 2063 ).गानायनी लखनऊ गोतमीनगर : मंजु प्रकाशन

पाण्डेय , डॉ रामलखन , ( 2014 ). गीतिकालहरी लखनऊ गोतमीनगरः हपर्वाप्रकाशन

पाण्डेय , डॉ रामलखन , ( 0000 ). एकाग्रभारतम्

पाण्डेय , डॉ रामलखन , ( 0000 ). शब्दार्थप्रकाश

पाण्डेय , डॉ रामलखन , ( 0000 ). सत्रहवी शताब्दी के संस्कृत महाकाव्य , लखनऊ गोतमीनगर : नाग पब्लिशर्स

**भरतमुनिः** (२०००). **नाट्यशास्त्रम्** (मणिप्रभादीक्षितव्याख्यासहित)। दिल्ली: नागप्रकाशनम्।

**शुक्लः, रामचन्द्रः** (१९९८). **संस्कृतनाटकस्य इतिहासः**। इलाहाबादः लोकभारतीप्रकाशनम्।

**द्विवेदी, हजारीप्रसादः** (२००२). **संस्कृतसाहित्यस्य इतिहासः**। दिल्ली: राजकमलप्रकाशनम्।

**शास्त्री, हरिप्रसादः** (१९९५). **नाट्यकलाकोशः**। वाराणसी: विश्वविद्यालयप्रकाशनम्।

संस्कृतग्रन्थरत्नमाला **(डिजिटलपुस्तकालयः)**। https://sanskritdocuments.org

भारतीयज्ञानपरम्पराप्रोजेक्ट्। https://iks.iitgn.ac.in

संस्कृतनाटकसंग्रहः (डिजिटलसंस्करणम्)। https://sanskritdzrama.com

भारतीयशिक्षामन्त्रालयस्य ज्ञानपरम्पराविभागस्य जालस्थानम्। https://www.education.gov.in/iks

राष्ट्रियसंस्कृतसंस्थानस्यप्रकाशनानि। https://www.sanskrit.nic.in


**संन्दर्भ**

1. एकाग्रभारतम्"
2. एकाग्रभारतम्"
3. एकाग्रभारतम्"
4. एकाग्रभारतम्"
5. एकाग्रभारतम्"
6. एकाग्रभारतम्"
7. एकाग्रभारतम्"
8. एकाग्रभारतम्"
9. एकाग्रभारतम्"
10. एकाग्रभारतम्"